# ॥ रात्रिसूक्तात्मकं देवीस्तोत्रम् ॥

.. rAtrisUktAtmakaM devIstotram ..

sanskritdocuments.org

August 20, 2017

# .. rAtrisUktAtmakaM devIstotram ..

# ॥ रात्रिसूक्तात्मकं देवीस्तोत्रम् ॥

## Sanskrit Document Information


Text title : devIstotramrAtrisUktAtmakaM

File name : devIstotramrAtrisUktAtmakaM.itx

Category : devii

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 2, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225-425

Latest update : March 22, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


August 20, 2017

*sanskritdocuments.org*

# ॥ रात्रिसूक्तात्मकं देवीस्तोत्रम् ॥

श्रीगणेशाय नमः ॥

रात्रिदेवीं प्रपद्येऽहं शरणागतवत्सलाम् ।
करालवदनां कृष्णां दुष्टग्रहविनाशिनीम् ॥ १॥

नमामि खड्गहस्तां तां खेटहस्तां भयानकाम् ।
वरदाभयहस्तां च भक्तलोकभयापहाम् ॥ २॥

शूलहस्तां शङ्खचक्रगदाचापेषुधारिणीम् ।
चतुर्भुजामष्टभुजां द्विभुजामरिमर्दिनीम् ॥ ३॥

अष्टादशभुजां लक्ष्मीं दशहस्तां सरस्वतीम् ।
सर्वसम्पत्प्रदात्रीं च सर्वविद्याप्रदायिनीम् ॥ ४॥

सहस्रबाहुचरणां सहस्रमुखलोचनाम् ।
सहस्रमुकुटोपेतां सहस्रचरणाम्बुजाम् ॥ ५॥

पद्मयोनिमुखाब्जस्थां विष्णुवक्षःस्थलस्थिताम् ।
शिवाङ्कनिलयां गौरीं वन्दे मूर्तित्रयात्मिकाम् ॥ ६॥

आर्भट्या वैष्णवी चोग्रा कुलानि विबुधद्विषाम् ।
या निर्दहति रक्ताक्षी तां वन्दे सिंहवाहनाम् ॥ ७॥

मधुकैटभसंहारं महिषासुरमर्दनम् ।
याऽकरोन्नौमि दुर्गां तां वधं शुम्भनिशुम्भयोः ॥ ८॥

इन्द्रादिसर्वदेवानां सूर्यादिज्योतिषामपि ।
सर्वशक्तिस्वरूपा या रात्रीं तां प्रणमाम्यहम् ॥ ९॥

रात्रिसूक्तं जपेद्रात्रौ त्रिवारं च दिने दिने ।
भूतप्रेतपिशाचादिचोरसर्पादिनाशनम् ॥ १०॥

इति श्रीरात्रिसूक्तात्मकदेवीस्तोत्रं सम्पूर्णम् ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. rAtrisUktAtmakaM devIstotram ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XeLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*